# ॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय १४

ततः स सचिवैः सार्धं षड्भिर्नित्यं बलोत्कटैः ।
महोदरप्रहस्ताभ्यां मारीचशुकसारणैः ॥१॥

धूम्राक्षेण च वीरेण नित्यं समरगृध्नुना ।
वृतः सम्प्रययौ श्रीमान्क्रोधाल्लोकान्दहन्निव ॥२॥

पुराणि स नदीः शैलान्वनान्युपवनानि च ।
अतिक्रम्य मुहूर्तेन कैलासं गिरिमाविशत् ॥३॥

तं निविष्टं गिरौ तस्मिन्राक्षसेन्द्रं निशम्य तु ।
राज्ञो भ्रातायमित्युक्त्वा गता यत्र धनेश्वरः ॥४॥

गत्वा तु सर्वमाचख्युर्भ्रातुस्तस्य विनिश्चयम् ।
अनुज्ञाता ययुश्चैव युद्धाय धनदेन ते ॥५॥

ततो बलस्य सङ्क्षोभः सागरस्येव वर्धतः ।
अभून्नैरृतराजस्य गिरिं सञ्चालयन्निव ॥६॥

युद्धं समभवद्यक्षराक्षससङ्कुलम् ।
व्यथिताश्चाभवंस्तत्र सचिवास्तस्य रक्षसः ॥७॥

तं दृष्ट्वा तादृशं सैन्यं दशग्रीवो निशाचरः ।
हर्षान्नादं ततः कृत्वा रोषात्समभिवर्तत ॥८॥

ये तु ते राक्षसेन्द्रस्य सचिवा घोरविक्रमः ।
ते सहस्रं सहस्राणामेकैकं समयोधयन् ॥९॥

ततो गदाभिः परिघैरसिभिः शक्तितोमरैः ।
वध्यमानो दशग्रीवस्तत्सैन्यं समगाहत ॥१०॥

तैर्निरुच्छ्वासवत्तत्र वध्यमानो दशाननः ।
वर्षमाणैरिव घनैर्यक्षेन्द्रैः संनिरुध्यत ॥११॥

स दुरात्मा समुद्यम्य कालदण्डोपमां गदाम् ।
प्रविवेश ततः सैन्यं नयन्यक्षान्यमक्षयम् ॥१२॥

स कक्षमिव विस्तीर्णं शुष्केन्धनसमाकुलम् ।
वातेनाग्निरिवायत्तोऽदहत्सैन्यं सुदारुणम् ॥१३॥

तैस्तु तस्य मृ
अल्पावशिष्टा

के चित्त्वायुध
ओष्ठान्स्वदशनै

भयादन्योन्यम
निषेदुस्ते तदा

हतानां स्वर्गस
प्रेक्षतामृषिसङ्घ

एतस्मिन्नन्तरे
अगमत्सुमहा

तेन यक्षेण मा
पतितः पृथिवी

प्राप्तसंज्ञो मुहू
तं यक्षं योधय

ततः काञ्चनचि
मर्यादां द्वारप

ततो राम दश
सूर्यभानुरिति

ततस्तोरणमुत
राक्षसो यक्षसृ
न क्षितिं प्रयय

स तु तेनैव तं
नादृश्यत तद

ततः प्रदुद्रुवुः
ततो नदीर्गुहा

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com